M. T. B. COLLEGE, SURAT
Manuscripts Library
No. Ref. / Ser. 1457
Title: Śaṅkara Stotra

1457

incomplete

Title	Śaṁkara Stōtra
Author	
Editor	
Year, Vols.	
Publisher	
Remarks	1457

हायतेनमः॥३०॥झकारायझमंत्रार्थस्वरूपायामृतात्मने॥झमध्यचंद्रबिंबायनमःसांबायशंभ
वे॥३१॥यञकारायञमंत्रार्थस्वरूपायञमूर्तये॥ज्ञप्तिमात्रैकनिष्ठानांमुक्तिदायनमोनमः॥३२॥
टकारायटटाटीटपूर्वकैस्तुमहारवैः॥अर्चितायसुरश्रेष्ठैरसुरैश्चनमोनमः॥३३॥ठकाराय
ठमंत्रार्थस्वरूपायठमंत्रतः॥ठठादिगणपूज्यायठमध्यायनमः॥३४॥डकारायडडाडीडूडे
डोडैश्चमहारवैः॥डामरैरभिपूज्यायनमोनित्यप्रियायच॥३५॥ढकारायढमंत्रार्थपे
रिज्ञानवतांनृणां॥ढंसंज्ञितमहानंदप्रदायसततंनमः॥३६॥णकारायणणाणीणू
णेणैणोणौरवैःसदा॥णाकिणीगणपूज्यायणसंज्ञायनमोनमः॥३७॥तकारायत
मंत्रार्थस्वरूपायततायच॥तत्वमित्यभिपूज्यायतत्वभूतायवैनमः॥३८॥थकाराय
थमंत्रार्थस्वरूपायथसंज्ञितैः॥महागणैश्चपूज्यायथमध्यायनमोनमः॥३९॥दका

हायतेनमः॥३०॥झकारायझमंत्रार्थस्वरूपायामृतात्मने॥झमध्यचंद्रबिंबायनमःसांबायशंभ
वे॥३१॥यञकारायञमंत्रार्थस्वरूपायञमूर्तये॥ज्ञप्तिमात्रैकनिष्ठानांमुक्तिदायनमोनमः॥३२॥
टकारायटटाटीटपूर्वकैस्तुमहारवैः॥अर्चितायसुरश्रेष्ठैरसुरैश्चनमोनमः॥३३॥ठकाराय
ठमंत्रार्थस्वरूपायठमंत्रतः॥ठठादिगणपूज्यायठमध्यायनमः॥३४॥डकारायडडाडीडूडे
डोडैश्चमहारवैः॥डामरैरभिपूज्यायनमोनित्यप्रियायच॥३५॥ढकारायढमंत्रार्थपे
रिज्ञानवतांनृणां॥ढंसंज्ञितमहानंदप्रदायसततंनमः॥३६॥णकारायणणाणीणू
णेणैणोणौरवैःसदा॥णाकिणीगणपूज्यायणसंज्ञायनमोनमः॥३७॥तकारायत
मंत्रार्थस्वरूपायततायच॥तत्वमित्यभिपूज्यायतत्वभूतायवैनमः॥३८॥थकाराय
थमंत्रार्थस्वरूपायथसंज्ञितैः॥महागणैश्चपूज्यायथमध्यायनमोनमः॥३९॥दका

रायदारूपमहाशक्तिमयायच॥ देशजातिविहीनायदिवारात्रायवैनमः॥४०॥ धकारायधर
ण्यादिमहाभूतस्वरूपिणे॥ धराधरहृदिस्थायधमध्यायनमोनमः॥४१॥ नकाराय
नगेंद्रायनामजात्यादिहेतवे॥ नमःशिवायनम्यायनानारूपायशूलिने॥४२॥ पकाराय
परानंदस्वरूपायपरात्मने॥ परापरविहीनायपावनायनमोनमः॥४३॥ फकारायफ
लाख्यायफलाख्यगणयोनये॥ फलाख्यगणपूज्यायनमःपूर्णस्वरूपिणे॥४४॥ बका
रायबकाराख्यमहाबीजैकजापिनां॥ बंधनागारनाशैकहेतवेवेधसेनमः॥४५॥ भका
रायभवाब्धेस्तुतारकायभवायते॥ भवशब्दैकवेद्यायभवानीपतयेनमः॥४६॥ मका
रायमहामायापाशनाशैकहेतवे॥ ममकारविहीनानांमहानंदायवैनमः॥४७॥ यका
य रायययथार्थाययथार्थज्ञानिनांनृणां॥ यथार्थप्रत्यगद्वैतब्रह्मणेसततंनमः॥४८॥ रकारा

यरतिप्रीतिप्रियायरतिहेतवे॥ रशब्दवपुषेरोगभवनाशायवैनमः॥४९॥ लका
रायलतासोमस्वरूपायलतात्मने॥ लाभालाभविहीनायलब्धरूपायवैनमः॥५०॥
वकारायवसिष्ठायवासुदेवायहेतवे॥ वांछावाणुरविछित्तिहेतुभूतायवैनमः॥५१॥
शकारायशरण्यायशंभवेशरणार्थिनां॥ शरणायशरच्चंद्रधवलायनमोनमः॥५२॥
षकारायषडाधारषट्चक्रादिस्वरूपिणे॥ षडक्षरनिषण्णायनमःषण्मुखहेतवे॥५३॥
दा सकारायसशब्दार्थस्वरूपायसदात्मने॥ साक्षिणेसाक्ष्यरूपाणांनमःसाधूपकारिणे॥५४॥
हकारायाहमर्थायसदाहंकारसाक्षिणे॥ हाहाहूहूकगीतायहंसरूपायवैनमः॥५५॥
लकारायलकाराख्यमहामंत्रप्रियायच॥ लोलाचंचलसंसारनाशनायनमोनमः॥५६॥
क्षकारायक्षमंत्रार्थस्वरूपायक्षमावतां॥ क्षेमदायममक्षेमस्वरूपायनमोनमः॥५७॥ मातृ
कावपुषेमातृमायमेयादिसाक्षिणे॥ मातृकामंत्रलभ्यायमहसेचनमोनमः॥५८॥ मातृका

सू॰ मातृकास्तो॰

धारभूताय मातृकामूलरूपिणे ॥ महामंत्रैकवाच्यायमहसे ब्रह्मणे नमः ॥ ५९ ॥ द्विधाभूत
महामंत्रस्वरव्यंजनरूपतः ॥ वाच्याया पद रूपाय पदाय महसे नमः ॥ ६० ॥ अष्टधा चा
ष्टवर्गैस्तु विभक्तायामलात्मने ॥ अशेषशब्दभूताय तत्तदर्थाय वै नमः ॥ ६१ ॥ शब्दान्व
यविहीनाय शब्दलभ्याय साक्षिणे ॥ सर्वोपाधिविहीनाय स्वयंभानाय वै नमः ॥ ६२ ॥ प्र
त्यक्षादिप्रमाणानामगम्याया परोक्षतः ॥ प्रतीताय स्वयं सर्वसाक्षिणे महसे नमः ॥ ६३ ॥
स्वस्वरूपादहीनाय वस्तुतो वस्तुतोपि च ॥ अर्थाय महते साक्षात्स्वयंभानाय वै नमः ॥ ६४ ॥
प्रसादलभ्याय शिवाय सत्यचिन्महासुखायापरवर्जिताय ॥ अतीव शुद्धस्य हृदंबु
जालये विभासमानाय नमो नमस्ते ॥ ६५ ॥ इति श्रीस्कंदपुराणे सूतसंहितायां यज्ञ
वैभवखंडे श्रीनारायणोक्तं शंकरस्तोत्रमेकोनविंशोध्यायस्थं संपूर्णं श्रीमच्छिवचरि

शिव